# HALF YEARLY EXAMINATION, 2024-25

**SANSKRIT**

**Time – 3:00 Hrs.** **Class – X** **M.M. : 80**

**Date – ____________________**

**Name of the student ________________________________________________Section _____**

**सामान्य निर्देशाः –**
i. अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
ii. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
खण्डः 'क' : अपठितावबोधनम् 10 अङ्काः
खण्डः 'ख' : रचनात्मक कार्यम् 15 अङ्काः
खण्डः 'ग' : अनुप्रयुक्त व्याकरणम् 25 अङ्काः
खण्डः 'घ' : पठितावबोधनम् 30 अङ्काः

## खण्डः : 'क' अपठितावबोधनम् – 10 अङ्काः

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत–** **10**

'संस्कृतभाषा सर्वभाषाणां जननी' इत्युच्यते।परम् अद्यत्वे छात्राणां मध्ये एकः चर्चितः प्रश्नः वर्तते यत् "संस्कृतपठनेन के लाभाः ?" अर्थात् संस्कृतपठनेन जीवनवृत्तेः अवसराः के ? वस्तुतः भौतिके युगे ईदृशी जिज्ञासा स्वाभाविकी एव । अस्याः जिज्ञासायाः समुचितं समाधानं सञ्चारमाध्यमेन कर्तुं शक्यते। वयम् पश्यामः यत् अद्यत्वे संस्कृतपठनेन अनेके लाभाः सन्ति। संस्कृतभाषा विश्वस्य प्राचीनतमासु भाषासु अन्यतमा अस्ति । ऐतिहासिकदृष्ट्या संस्कृते लिखिताः ग्रन्थाः वेदाः महत्त्वपूर्णं स्थानं भजन्ते। आधुनिक संस्कृतस्य वैज्ञानिक भाषारूपेण सर्वत्र महत्त्वपूर्णं स्थानं दृश्यते। यदा विश्वं कृत्रिममेधा विषये अनुसन्धानं करोति तत्र संस्कृतं महत् साहाय्यं कर्तुं शक्नोति।यतो हि संस्कृतस्य व्याकरणं पूर्णतया वैज्ञानिकम् अस्ति।वर्तमान समये संस्कृतस्य अध्येतारः शिक्षणकौशल-चिकित्सा-खगोल-विद्या-वास्तुविद्या-'आई.ए.एस.' प्रभृति सर्वेषु क्षेत्रेषु स्वप्रतिभाप्रदर्शनं कुर्वन्ति। अस्माकं संस्कृतिः संस्कृताधारिता अपि। अतएव संस्कृतभाषायाः अध्ययनं जीवनमूल्यपरकम् जीवनवृत्तिसाधनपरम् च अस्ति, नात्र कोऽपि संदेहः I

**(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)**
**2x1=2**

(i) सर्वभाषाणां जननी का ?

(ii) अस्माकं संस्कृतिः का आधारिता वर्तते ?

(iii) कस्य व्याकरणं वैज्ञानिकम् ?

**(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)**
**2x2=4**

(i) ऐतिहासिकदृष्ट्या के महत्त्वपूर्णं स्थानं भजन्ते ?

(ii) वर्तमानसमये शिक्षणकौशलादिषु सर्वेषु क्षेत्रेषु के स्वप्रतिभा प्रदर्शनं कुर्वन्ति ?

(iii) संस्कृतभाषायाः अध्ययनं कीदृशम् अस्ति ?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।** **1**

**(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)**
**3x1=3**

(i) 'पश्यामः' इति क्रिया पदस्य कर्तृपदं किम् ?

(a) अनेके (b) वयम् (c) लाभाः (d) संस्कृतपठनेन

(ii) 'समुचितम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(a) समाधानम् (b) संस्कृतशिक्षकः (c) स्वानुभवैः (d) जिज्ञासायाः

(iii) 'हानयः' इति पदस्य किं विपर्ययपदं गद्यांशे प्रयुक्तम् ?

(a) सन्ति (b) लिखिताः (c) लाभाः (d) अनेके

(iv) 'अध्येतारः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(a) अस्ति (b) सन्ति (c) भजन्ते (d) कुर्वन्ति

## खण्डः 'ख' रचनात्मकं कार्यम् – 15 अङ्काः

**प्र.2 भवान् सौरवः । स्वमित्रं शाश्वतं प्रति स्वयात्रावृत्तान्तविषये लिखितं पत्र मञ्जूषायाः पदैः पूरयित्वा पुनः लिखतु ।**

प्रयागराजतः **10x1/2=5**

दिनाङ्कः ......................

प्रिय मित्र (i)......................!

सस्नेहं (ii)........................

अत्र सर्व कुशलं तत्रास्तु । गतमासे अहं (iii)...............शिमलां गतवान् । तत्र पर्वतानां (iv)................दृष्ट्वा मम मनः अतीव (v)...............जातम् । तत्र (vi).................पर्यावरणं वर्तते । शिमला (vii)............राजधानी अस्ति। अतः तत्र सर्वत्र विकासः दृश्यते । देशात् विदेशेभ्यः च पर्यटकाः भ्रमणाय (viii)......................आगच्छन्ति । अहमपि शिमलाभ्रमणं कृत्वा आत्मानं (ix)...............मन्ये । भवान् अपि समयं प्राप्य एकवारं शिमलां गच्छेत् ।

भवदीयं प्रियं मित्रम्

(x)......................।

**मञ्जूषा**

| |
|---|
| सौरवः, शिमलाम्, भ्रमणाय, प्रसन्नम्, धन्यम्, सौन्दर्यम्, शुद्धम्, हिमाचलप्रदेशस्य, नमोनमः, शाश्वत ! |

**प्र.3 अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त पदानां सहायतया पञ्च वाक्यानि लिख्यन्ताम् –** **5×1=5**



| |
|---|
| **मञ्जूषा –** आरोपयति, वन-महोत्सवः, छात्राः, जलपात्रेण, मृत्तिकापात्रेषु, वृक्षान्, पादपान्, अध्यापिकाः, विद्यालये, प्राङ्गणे, पर्यावरण-दृष्ट्या, सिञ्चन्ति |

**अथवा**

**निम्नलिखितं विषयमधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत :**

**'मम प्रियं पुस्तकम्'**

| |
|---|
| **मञ्जूषा –** मम, पठने, महती, ज्ञानस्य, साधनम्, भगवद्गीता, पुस्तकम्, प्रियम्, रुचिः, गीतायाम्, भण्डारः, कर्मयोगः, भक्तियोगः, अर्जुनम् प्रति, उपदेशः । |

**प्र.4 अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं प्रश्नपञ्चकम्)** **5x1=5**

(i) मैं संस्कृत भाषा जानता हूँ ।

(ii) राम मेरा मित्र है ।

(iii) दो किसानों ने खेत जोता था ।

(iv) मैं आलस्य का त्याग करूँगा ।

(v) हमें रोज व्यायाम करना चाहिये ।

(vi) कुत्ता बाघ से डरता है ।

(vii) तुम सब मिलकर गीत बोलो I

## खण्डः 'ग' (अनुप्रयुक्त व्याकरणम् – 25 अङ्काः)

**प्र.5 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिम् विच्छेदं वा कृत्वा लिखत I (केवलं प्रश्नचतुष्टयम्) 4×1=4**

(i) प्रकृतिरेव शरणम्।

(ii) अचिरादेव तत्र प्रवर्षः समजायत ।

(iii) □□□□□□□ + □ □□ □□□□□ □□□□□□□□□ □

(iv) शरीरस्य सत् + निवेशः समरूप एव ।

(v) गावश्च गोभिः तुरगाः + तुरङ्गैः I

**प्र.6 अधोलिखितवाक्येषु रेखाङ्कितपदस्य समासं विग्रहं वा विकल्पेभ्यः चिनुत – (केवलं प्रश्नचतुष्टयम्) 4×1=4**

(i) देहस्थितः देहविनाशाय।

(a) देहस्य स्थितः (b) देहे स्थितः (c) देहम् स्थितः (d) देहेन स्थितः

(ii) सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

(a) सुरभेः वचनम् (b) सुरभयाः वचनम् (c) सुरभिः वचनम् (d) सुरभये वचनम्

(iii) लवः च कुशः च सभां प्रविशतः।

(a) लवकुशाः (b) लवकुशे (c) लवकुशौ (d) लवकुशम्

(iv) वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

(a) मलानाम् अभावः (b) मलम् अनतिक्रम्य (c) मलस्य समीपम् (d) मलेन समीपम्

(v) परं प्रत्युत्पन्नमतिः सा उवाच I

(a) प्रत्युत्पन्ना मतिः यस्याः सा (b) प्रत्युत्पन्ना मतिः येन सा

(c) प्रत्युत्पन्ना मतिः यया सा (d) प्रत्युत्पन्नम् मतिः यया सः

**प्र.7 अधोलिखित वाक्येषु रेखाङ्कित पदानां प्रकृति प्रत्ययौ संयोज्य वियुज्य वा उत्तरं विकल्पेभ्यः चिनुत– 4x1=4 (केवलं प्रश्नचतुष्टयम्)**

(i) इयं काचित् व्याघ्रमारी इति ।

(a) व्याघ्रमार + टाप् (b) व्याघ्रमार + ङीप् (c) व्याघ्रमार + ई (d) व्याघ्रमार + तल्

(ii) रामः कथयति – अल□□ अति शालीनतया ।

(a) शालीन + टाप् (b) शालीनता + तल् (c) शालीन + तल् (d) शाला + टाप्

(iii) व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती–

(a) बुद्धि + मतुप् (b) बुद्धि + क्तवतु (c) बुद्धि + णिनि (d) बुद्धि+टाप्

(iv) पशुपति मस्तक केतकच्छदत्वम्

(a) छद + त्व (b) छदत् + त्वम् (c) छद + मतुप् (d) छद + ठक्

(v) किं नामधेय+टाप् युवयोः जननी I

(a) नामधेयम् (b) नामधेया (c) नामधेयः (d) नामधेयाः

**प्र.8 वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्) 3×1=3**

(i) शिवा – रमे । अद्य विलम्बेन कथम्?

रमा – शिवे ! अद्य...................... उत्सवं द्रष्टुं गच्छामि ।

(a) मम (b) अहम् (c) मया (d) सः

(ii) शिवा – किं तत्र तव सखी अपि गच्छति ?

रमा – नहि, तत्र........................... एव गम्यते ।

(a) अहम् (b) सख्या (c) मया (d) सा

(iii) शिवा – साधु ! किं तत्र जनाः अपि उत्सवं पश्यन्ति ? रमा – आम्, तत्र जनैः अपि...................... दृश्यते ।

(a) उत्सवः (b) उत्सवम् (c) उत्सवान् (d) उत्सवाः

(iv) शिवा – रमे! अद्य विद्यालये सङ्गीत प्रतियोगिता भवति । रमा शोभनम् । तत्र मया अपि गीतं.............I

(a) गायति (b) गीयते (c) गीयन्ते (d) गायतः

□□□.9 **कालबोधक शब्दैः अधोलिखित-दिनचर्यां पूरयत – (केवलं प्रश्न चतुष्टयम्) :** **4x1=4**

(i) चरितार्थः प्रातः <u>7:00</u> वादने उद्यानं गच्छति ।

(ii) <u>8:00</u> वादने सः गृहं प्रत्यागच्छति ।

(iii) तस्य प्रथमा कक्षा <u>9:30</u> वादने भवति ।

(iv) <u>12:45</u> वादने सः अध्ययनकार्यात् मुक्तो भवति ।

(v) सः <u>2:15</u> वादने क्रीडितुं क्रीडाक्षेत्रं गच्छति ।

**प्र.10 मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नत्रयम्) 3×1=3**

(i) गङ्गा हिमालयात् प्रभवति, यमुना..................... प्रभवति ?

(ii) विद्यालये............................. कार्यक्रमः भविष्यति ।

(iii) ................................वृष्टिः प्रारभत ।

(iv) धनस्य....................... प्रयोगं मा कुर्युः ।

| **मञ्जूषा – सहसा, वृथा, श्वः, कुतः** |
|---|

□□□.11 **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत : (केवलं प्रश्नत्रयम्) 3×1=3**

(i) क्रीडाक्षेत्रे छात्राः <u>पठथः</u> ।

(a) पठसि (b) पठथ (c) पठन्ति (d) पठतः

(ii) ह्यः विद्यालयस्य वार्षिकोत्सवः <u>भविष्यति</u> ।

(a) भवति (b) भवतु (c) अभवत् (d) अभवत

(iii) बलीवर्दः शरीरेण <u>दुर्बलम्</u> आसीत् ।

(a) दुर्बलः (b) दुर्बला (c) दुर्बलस्य (d) दुर्बलाः

(iv) <u>महावृक्षाः</u> सेवितव्यः ।

(a) महावृक्षे (b) महावृक्षः (c) महावृक्षम् (d) महावृक्षस्य

## <u>खण्डः घ (पठितावबोधनम् – 30 अङ्काः)</u>

**प्र.12 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न? इति प्रत्यवोचत्। भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्? इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत् –

यदि पुत्रसहस्रं मे सर्वत्र सममेव मे।
दीनस्य तु सतः शक्र! पुत्रस्याभ्यधिका कृपा।

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×½=1**

(i) पुत्रस्य दीनदशां दृष्ट्वा का रोदिति?

(ii) वृषभः किं न कर्तुं शक्नोति?

(iii) दीनस्य पुत्रस्य मातुः कीदृशी कृपा भवति ?

**(ब) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×1=2**

(i) इन्द्रेण पृष्टा सुरभिः किम् प्रत्यवोचत् ?

(ii) वृषभं कः बहुधा पीडयति ?

(iii) इन्द्रः सुरभिम् किम् अपृच्छत् ?

**(स) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)** **2×1=2**

(i) 'कृषकः' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'रोदिमि' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'काठिन्येन' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

**प्र.13 अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **(5)**

संपत्तौ च विपत्तौ च महतामेकरूपता।

उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×½=1**

(i) उदये सति सूर्यः कीदृशः भवति ?

(ii) अस्तमये च कस्य वर्णः रक्तः भवति ?

(iii) संपत्तौ च विपत्तौ च केषाम् एकरूपता भवति ?

**(ब) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×1=2**

(i) महताम् एकरूपता कदा भवति ?

(ii) उदये सवितुः कीदृशः वर्णः भवति ?

(iii) केषाम् संपत्तिविपत्तौ एकरूपता भवति ?

**(स) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) 'संपत्तौ' इति पदस्य विपर्ययपदं पद्यांशे किमस्ति ?

(ii) श्लोके 'सूर्यः' इति पदस्य पर्यायपदं किम् ?

(iii) 'सविता' इति पदस्य विशेषणपदं पद्यांशे किम् ?

**प्र.14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(5)**

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः – इतः इतः आर्यौ ।

कुशलवौ – (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः – युष्मद् दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः ।

(आसनार्धमुपवेशयति)

उभौ– राजासनं खल्वेतत्, न युक्तमध्यासितुम् ।

रामः – सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम् ।

(अङ्कमुपवेशयति)

उभौ– (अनिच्छां नाटयतः) राजन् । अलमतिदाक्षिण्येन।

रामः – अलमतिशालीनतया ।

भवति शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक केतकच्छदत्वम् ॥

रामः – एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता ?

लवः– भगवन् सहस्रदीधितिः ।

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×½=1**

(i) कुशलवयोः वंशस्य कर्ता कः ?

(ii) कौ अनिच्छां नाटयतः ?

(iii) कुशलवयोः मार्गम् कः निर्दिशति ?

**(ब) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **2×1=2**

(i) हिमकरः कस्मात् भावात् पशुपतेः मस्तके व्रजति ?
(ii) कुशलवौ रामम् उपसृत्य प्रणम्य च किं पृच्छतः ?
(iii) रामः कथं वंशपरिचयं पृच्छति ?

**(स) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) 'ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।' अत्र कर्तृपदं किम् ?
(ii) 'समीपं गत्वा' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?
(iii) 'निर्गच्छतः' इति पदस्य विपर्ययपदं नाट्यांशात् चित्वा लिखत।

**प्र.15 रेखाङ्कितपदानाम् आधृत्य प्रश्नवाचकं पदं लिखत – (केवलं प्रश्नचतुष्टयम्)** **4×1=4**

(i) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते ।
(ii) कश्चित् धूर्तः श्रृगालः हसन् आह ।
(iii) मे बहूनि अपत्यानि सन्ति।
(iv) त्वं मानुषात् बिभेषि ।
(v) बलवान् बलं वेत्ति ।

**प्र.16 मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत –** **4×1=4**

'प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः ।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ॥
मानवाय जीवनं कामये नो जीवन्मरणम् । शुचि ।॥

**अन्वयः –** (i)............प्रस्तरतले पिष्टाः नो (ii)..................। निसर्गे (iii)............सभ्यता समाविष्टा न (iv)..............। मानवीय जीवन कामये नो जीवन्मरणम् ।

| **मञ्जूषा – पाषाणी, स्यात्, लतातरुगुल्माः, भवन्तु** |
|---|

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितं पदं चित्वा पूरयत –**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥

**भावार्थः–** अस्य भावोऽस्ति यत् (i)............ शरीरे स्थितम् (ii)..............एव तेषां महान् शत्रुः अस्ति। एवमेव पुरुषार्थम् इव तेषां कोऽपि अन्यः (iii)............नास्ति । तं (पुरुषार्थ) कृत्वा (iv)............ कदापि न दुखीयन्ति ।

| **मञ्जूषा – मानवाः, मानवानाम्, बन्धुः, आलस्यम्** |
|---|

**प्र.17 अधोलिखित-कथांशं समुचित-क्रमेण लिखत –** **8x½=4**

(i) एकः शरीरेण दुर्बलः जवेन गन्तुम् अशक्तः च आसीत् ।
(ii) सुरभेः इमाम् अवस्थां दृष्ट्वा सुराधिपः ताम् अपृच्छत् ।
(iii) एकः कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ।
(iv) एतत् दृष्ट्वा माता सुरभिः रोदितुम् आरब्धा ।
(v) सर्वेषु अपत्येषु जननी तुल्यवत्सला भवति।
(vi) कृषकः तम् उत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः ।
(vii) कृषकः तं दुर्बलं वृषभं बहुधा पीडयति स्म।
(viii) पुत्रस्य दैन्यं दृष्ट्वा रोदिमि।

**प्र.18 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत – (केवलं प्रश्नत्रयम्)** **3×1=3**

(i) पुर-कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम् ।
(a) पुराणम् (b) ग्रामः (c) नगरम् (d) पुरा

(ii) 'शीघ्रम्' इति पदस्य पर्यायपदं किम् अस्ति ?
(a) चिरम् (b) अचिरम् (c) चण्डवात् (d) भृशम्

(iii) हयाश्च नागाः च वहन्ति बोधिताः ।
(a) सर्पाः (b) हस्तिनः (c) अश्वाः (d) वानराः

(iv) <u>वासव</u>! अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि ।

(a) पुत्र ! (b) इन्द्र ! (c) शिव ! (d) बालक !